# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – २** | **प्रश्नपत्रम् – ३** | **गुणाः – ५०** |
| **विषयः – वेदः** | **सत्रम् – ४** | **समयः – १० तः १२** |
| **दिनाङ्कः – १५/०७/२०२१** | **सन्दर्भग्रन्थः – यज्ञतत्त्वप्रकाशः** | |

**सूचना -** **निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १** **अधोलिखितेषु द्वयोरुपरि स्वकीयं विचारमधीतशास्त्रानुसारं वर्णयत ।**

१ गार्हपत्याधानम् ।
२ पार्थिवाः सम्भाराः ।
३ शुक्लप्रतिपद्दिनकृत्यम् (दर्शयागसन्दर्भे) ।
४ वत्सापकरणम् ।

**प्रश्नः २** पूर्णयागस्य सामान्यपरिचयः प्रस्तूयताम् ।

**प्रश्नः ३** पिण्डपितृयज्ञस्य विषये एकं निबन्धं लिखत ।

**प्रश्नः ४** चातुर्मासयागस्य सामान्यपरिचयः प्रस्तूयताम् ।

**प्रश्नः ५** दर्शयागे के सन्ति विशेषाः ?

**प्रश्नः ६** **अधोलिखितेषु द्वयोः टिप्पणीं लिखत ।**
१ आग्रयणेष्टिः ।
२ सोमयागे अधिकारी ।
३ प्रवर्ग्यसम्भाराः ।
४ अवभृथेष्टिः ।

**प्रश्नः ७** यथाशास्त्रं सोमयागस्य विषयवस्तु प्रस्तूयताम् ।

**प्रश्नः ८** अश्वमेधयागस्योपरि एकं निबन्धं लिखत ।

**प्रश्नः ९** राजसूययागस्य परिचयं यच्छत ।

**प्रश्नः १०** चयनयागसम्बन्धे यथाशास्त्रं विवेचयत ।

**प्रश्नः ११** **दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ चितिनिर्माणे कतिविधा इष्टकाः भवन्ति ?

२ कति प्रस्ताराः ?

३ किं नाम रुक्मः ?

४ शतरुद्रीयहोमप्रसङ्गे इष्टकाया उपरि केन जुहुयात् ?

५ अरत्नेः स्वरूपं किम् ?

६ किं नाम इष्टिपूर्वाधानम् ?

७ 'ब्रह्मोदनः' इति कथनेन किं ज्ञायते ?

८ आभ्युदयिकश्राद्धविधानं कदा भवति ?

९ कति पवमानेष्टयः ?

१० पूर्णपात्रस्य लक्षणं किम् ?

११ प्रादेशस्य स्वरूपं किम् ?

१२ अग्निहोत्रे कर्ता कः ?

१३ 'जुहोति' इति शब्देन किं बोध्यते ?

१४ पूर्णयागस्य मुख्यकालः प्रधानानुष्ठानस्य कः ?

१५ कति प्रयाजाः ?

****